# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-3) | **प्रश्नपत्रम्** – २ | **गुणाः** – ७० |
| **विषयः** – धर्मशास्त्रम् | **कोड- CC- 5-3-7** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०५/१२/२०१८ | **सन्दर्भग्रन्थः**– निर्णयसिन्धुः – परिच्छेद–३ | |

---

**॥ प्रथमान्वितिः ॥**

**प्र–१ एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. मुण्डनं पिण्डदानञ्च प्रेतधर्मं च सर्वशः ।
न जीवत्पितृकः कुर्यात् गर्भिणीपतिरेव च ॥

२. मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्य स्पर्शने चैव न स्नायादुष्ण वारिणा ॥

**प्र–२ एकस्य निबन्धात्मकमुत्तरं लिखत । १०**

१. दत्तकपुत्रविधानम् ।

२. त्रिकप्रसवशान्तिः ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. यावद्ब्रह्मोपदेशस्तु तावत्सन्ध्यादिकं च न ।
ततो मध्याह्नसन्ध्यादि सर्वकर्म समाचरेत् ॥

२. रात्रौ यावद्वयादर्वाक् सप्तमी वा त्रयोदशी ।
प्रदोषः स तु विज्ञेयः सर्वविद्या विगर्हितः ॥

**प्र–४ एकस्य निबन्धात्मकमुत्तरं लिखत । १०**

१. पुनरूपनयने कर्तव्यम् ।

२. संस्कारलोपे कर्तव्यम् ।

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. विवाहे कन्यापरीक्षणविधानं ग्रन्थोक्तदिशा लिखत ।

२. विवाहनिश्चये वधूवरगृहे कस्यचिन्मृतौ को निर्णयः? लिखत ।

**प्र-६ एकस्य निबन्धात्मकमुत्तरं लिखत । १०**

१. गान्धर्वाद्यष्टविवाहा: ।

२. पुनर्विवाह: ।

**प्र-७ एकस्य उत्तरं सविस्तरेण लिखत । ०५**

१. लिङ्गप्रतिष्ठापने कर्तव्याकर्तव्यं ग्रन्थोक्तदिशा निरूपयत ।

२. गृहारम्भादिविचारं ग्रन्थोक्तदिशा निरूपयत ।

**॥ चतुर्थान्वितिः ॥**

**प्र-८ एकस्य निबन्धात्मकमुत्तरं लिखत । १०**

१. निर्णयसिन्धुग्रन्थस्य वैशिष्ट्यम् ।

२. धर्मशास्त्रग्रन्थानाम् उपयोगिता ।

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१. निर्णयसिन्धुग्रन्थे कति परिच्छेदा: सन्ति?

२. संस्कारा: कति सन्ति?

३. अच्छिन्ननाभिपुत्रजन्मनि किं कर्तव्यम्?

४. किन्नाम अभूक्तमूलम्?

५. व्यतीपाते जन्मनि किं फलम्?

६. मूलनक्षत्रे पुत्र जन्मनि किं फलम्?

७. अन्नप्राशनसंस्कार: कस्मिन् मासे कर्तव्य:? पारिजाते नारदोक्तं लिखत ।

८. अष्टमे वर्षे यज्ञोपवितसंस्कारकरणे किं फलम्?

९. एकोदरयोर्द्वयोरेकदिनोद्वहने किं फलम्?

१०. ग्रन्थकर्तु: नाम किम्?

११. विवाहप्रकारा: कति सन्ति?

१२. अग्रजाया: कन्याया: गृहे गत्वा किन्नकर्तव्यम्?

१३. धर्मशब्दस्य कोऽर्थ: ?

१४. सिन्धुशब्दस्य कोऽर्थ: ?

१५. बृहस्पतिमतानुसारं गर्भिण्यां मातरि कस्य क्षौरकर्म न कर्तव्यम्?

–००–